# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा –शास्त्री–१ (SEM-१) | प्रश्नपत्रम् — ५ | |
| विषयः – नव्यन्यायः | (C.C- 1.1.1 )<br>सन्दर्भग्रन्थः– न्या.सि.मुक्तावली, आरम्भात् | गुणाः – ७० |
| दिनाङ्कः – १४/१०/२०१९ | सा. वैधर्म्यप्रकरणान्ता | समयः –११:३० तः ०२:३० |

**विभागः- १**

**प्रश्नः- १ निम्नलिखितेषु द्वयोः व्याख्यां लिखत।** (१०)

(१) "क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत्" प्रतिपादयत।

(२) मङ्गलस्य कर्तव्यत्वे प्रमाणान्युपस्थापयत।

(३) चूडामणीकृतविधुः वलयीकृतवासुकिः।
भवो भवतु भव्याय लीलाताण्डवपण्डितः॥ व्याख्यात।

**प्रश्नः- २ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** (१०)

(१) शक्तिसादृश्यौ पदार्थान्तराविति पूर्वपक्षं प्रतिपाद्य खण्डयत।

(२) 'सद्रव्ये'ति मङ्गलश्लोकं यथाग्रन्थं प्रतिपादयत।

**विभागः- २**

**प्रश्नः- ३ निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत।** (१०)

(१) समवायपदार्थं यथाग्रन्थं विवृणुत।

(२) सामान्यपदार्थस्य लक्षणदलसार्थक्यं साधयत।

(३) अभावपदार्थं यथामुक्तावलि विशदयत।

**प्रश्नः- ४ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** (१०)

(१) तमसः दशमद्रव्यत्वे पूर्वपक्षं प्रतिपाद्य वारयत।

(२) जातिबाधकसङ्ग्रहं लक्षणोदाहरणैः प्रतिपादयत।

**विभागः- ३**

**प्रश्नः- ५ निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत।** (१०)

(१) द्रव्यादयः पञ्च भावा अनेके समवायिनः।
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः॥ व्याख्यात।

(२) नवद्रव्याणां साधर्म्याणि प्रतिपादयत।

(३) सप्तपदार्थानां साधर्म्यवैधर्म्ये यथाग्रन्थं व्याख्यात ।

**प्रश्नः- ६ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** (१०)

**(१)** पञ्चान्यथासिद्धयः सकारिकाभिः विशदयत ।

**(२)** कारणत्रैविध्यं यथामुक्तावलिं व्याख्यात।

**प्रश्नः- ७ निम्नलिखितप्रश्नेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखन्तु।** (१०)

(१) कः विशेषः?

(२) कर्मत्वजातिः कथं सिद्ध्यति?

(३) शक्तिसादृश्यौ पदार्थान्तरमिति केषां मतम् ?

(४) का नाम अनवस्था?

(५) परत्वं किम्?

(६) किं नाम वैधर्म्यम्?

(७) समवायसम्बन्धः कुत्र तिष्ठति?

(८) किं नाम ध्वंसत्वम्?

(९) सत्ता केषां साधर्म्यम्?

(१०) तेजसि कति गुणाः सन्ति?

(११) संख्यादिपञ्चकं कस्य?

(१२) कानि नित्यद्रव्याणि?

(१३) असमवायिकारणस्य लक्षणं किम् ?

(१४) जातिबाधकसङ्ग्रहः कः?

(१५) न्यायसिद्धान्तमुक्तावल्याः रचयिता कः?

****************